श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ सप्तपञ्चाशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ सप्तपञ्चाशः सर्गः ॥

## रावणाज्ञया प्रहस्तस्य विपुलसैन्येन सह युद्धाय प्रस्थानम्

अकम्पनवधं श्रुत्वा क्रुद्धो वै राक्षसेश्वरः।
किञ्चिद् दीनमुखश्चापि सचिवांस्तानुदैक्षत ॥ **6.57.1** ॥

स तु ध्यात्वा मुहूर्तं तु मन्त्रिभिःसंविचार्य च।
ततस्तु रावणः पूर्वदिवसे राक्षसाधिपः।
पुरीं परिययौ लङ्कां सर्वान् गुल्मानवेक्षितुम् ॥ **6.57.2** ॥

तां राक्षसगणैर्गुप्तां गुल्मैर्बहुभिरावृताम्।
ददर्श नगरीं राजा पताकाध्वजमालिनीम् ॥ **6.57.3** ॥

रुद्धां तु नगरीं दृष्ट्वा रावणो राक्षसेश्वरः।
उवाचात्महितं काले प्रहस्तं युद्धकोविदम् ॥ **6.57.4** ॥

पुरस्योपनिविष्टस्य सहसा पीडितस्य ह।
नान्ययुद्धात् प्रपश्यामि मोक्षं युद्धविशारद ॥ **6.57.5** ॥

अहं वा कुम्भकर्णो वा त्वं वा सेनापतिर्मम।
इन्द्रजिद् वा निकुम्भो वा वहेयुर्भारमीदृशम् ॥ **6.57.6** ॥

स त्वं बलमतः शीघ्रमादाय परिगृह्य च।
विजयायाभिनिर्याहि यत्र सर्वे वनौकसः ॥ **6.57.7** ॥

निर्याणादेव तूर्णं च चलिता हरिवाहिनी।
नर्दतां राक्षसेन्द्राणां श्रुत्वा नादं द्रविष्यति॥ **6.57.8** ॥

चपला ह्यविनीताश्च चलचित्ताश्च वानराः।
न सहिष्यन्ति ते नादं सिंहनादमिव द्विपाः॥ **6.57.9** ॥

विद्रुते च बले तस्मिन् रामः सौमित्रिणा सह।
अवशस्ते निरालम्बः प्रहस्त वशमेष्यति॥ **6.57.10** ॥

आपत्संशयिता श्रेयो नात्र निःसंशयीकृता।
प्रतिलोमानुलोमं वा यत् तु नो मन्यसे हितम्॥ **6.57.11** ॥

रावणेनैवमुक्तस्तु प्रहस्तो वाहिनीपतिः।
राक्षसेन्द्रमुवाचेदमसुरेन्द्रमिवोशना॥ **6.57.12** ॥

राजन् मन्त्रितपूर्वं नः कुशलैः सह मन्त्रिभिः।
विवादश्चापि नो वृत्तः समवेक्ष्य परस्परम्॥ **6.57.13** ॥

प्रदानेन तु सीतायाः श्रेयो व्यवसितं मया।
अप्रदाने पुनर्युद्धं दृष्टमेव तथैव नः॥ **6.57.14** ॥

सोऽहं दानैश्च मानैश्च सततं पूजितस्त्वया।
सान्त्वैश्च विविधैः काले किं न कुर्यां हितं तव॥ **6.57.15** ॥

नहि मे जीवितं रक्ष्यं पुत्रदारधनानि च।
त्वं पश्य मां जुहूषन्तं त्वदर्थे जीवितं युधि॥ **6.57.16** ॥

एवमुक्त्वा तु भर्तारं रावणं वाहिनीपतिः।
उवाचेदं बलाध्यक्षान् प्रहस्तः पुरतः स्थितान्॥ **6.57.17** ॥

समानयत मे शीघ्रं राक्षसानां महाबलम्।
मद्बाणानां तु वेगेन हतानां च रणाजिरे॥ **6.57.18** ॥

अद्य तृप्यन्तु मांसादाः पक्षिणः काननौकसाम्।
तस्य तद् वचनं श्रुत्वा बलाध्यक्षा महाबलाः॥ **6.57.19** ॥

बलमुद्योजयामासुस्तस्मिन् राक्षसमन्दिरे।
सा बभूव मुहूर्तेन भीमैर्नानाविधायुधैः॥ **6.57.20** ॥

लङ्का राक्षसवीरैस्तैर्गजैरिव समाकुला।
हुताशनं तर्पयतां ब्राह्मणांश्च नमस्यताम्॥ **6.57.21** ॥

आज्यगन्धप्रतिवहः सुरभिर्मारुतो ववौ।
स्रजश्च विविधाकारा जगृहुस्त्वभिमन्त्रिताः॥ **6.57.22** ॥

सङ्ग्रामसज्जाः संहृष्टा धारयन् राक्षसास्तदा।
सधनुष्काः कवचिनो वेगादाप्लुत्य राक्षसाः॥ **6.57.23** ॥

रावणं प्रेक्ष्य राजानं प्रहस्तं पर्यवारयन्।
अथामन्त्र्य तु राजानं भेरीमाहत्य भैरवाम्॥ **6.57.24** ॥

आरुरोह रथं युक्तः प्रहस्तः सज्जकल्पितम्।
हयैर्महाजवैर्युक्तं सम्यक्सूतं सुसंयतम्॥ **6.57.25** ॥

महाजलदनिर्घोषं साक्षाच्चन्द्रार्कभास्वरम्।
उरगध्वजदुर्धर्षं सुवरूथं स्वपस्करम्॥ **6.57.26** ॥

सुवर्णजालसंयुक्तं प्रहसन्तमिव श्रिया।
ततस्तं रथमास्थाय रावणार्पितशासनः॥ **6.57.27** ॥

लङ्काया निर्ययौ तूर्णं बलेन महता वृतः।
ततो दुन्दुभिनिर्घोषः पर्जन्यनिनदोपमः।
वादित्राणां च निनदः पूरयन्निव मेदिनीम्॥ **6.57.28** ॥

शुश्रुवे शङ्खशब्दश्च प्रयाते वाहिनीपतौ।
निनदन्तः स्वरान् घोरान् राक्षसा जग्मुरग्रतः॥ **6.57.29** ॥

भीमरूपा महाकायाः प्रहस्तस्य पुरःसराः।
नरान्तकः कुम्भहनुर्महानादः समुन्नतः।
प्रहस्तसचिवा ह्येते निर्ययुः परिवार्य तम्॥ **6.57.30** ॥

व्यूढेनैव सुघोरेण पूर्वद्वारात् स निर्ययौ।
गजयूथनिकाशेन बलेन महता वृतः॥ **6.57.31** ॥

सागरप्रतिमौघेन वृतस्तेन बलेन सः।
प्रहस्तो निर्ययौ क्रुद्धः कालान्तकयमोपमः॥ **6.57.32** ॥

तस्य निर्याणघोषेण राक्षसानां च नर्दताम्।
लङ्कायां सर्वभूतानि विनेदुर्विकृतैः स्वरैः॥ **6.57.33** ॥

व्यभ्रमाकाशमाविश्य मांसशोणितभोजनाः।
मण्डलान्यपसव्यानि खगाश्चक्रू रथं प्रति॥ **6.57.34** ॥

वमन्त्यः पावकज्वालाः शिवा घोरा ववाशिरे।
अन्तरिक्षात् पपातोल्का वायुश्च परुषं ववौ॥ **6.57.35** ॥

अन्योन्यमभिसंरब्धा ग्रहाश्च न चकाशिरे।
मेघाश्च खरनिर्घोषा रथस्योपरि रक्षसः॥ **6.57.36** ॥

ववर्षू रुधिरं चास्य सिषिचुश्च पुरःसरान्।
केतुमूर्धनि गृध्रस्तु विलीनो दक्षिणामुखः॥ **6.57.37** ॥

नदन्नुभयतः पार्श्वं समग्रां श्रियमाहरत्।
सारथेर्बहुशश्चास्य सङ्ग्राममवगाहतः॥ **6.57.38** ॥

प्रतोदो न्यपतद्धस्तात् सूतस्य हयसादिनः।
निर्याणश्रीश्च या च स्याद् भास्वरा च सुदुर्लभा॥ **6.57.39**॥

सा ननाश मुहूर्तेन समे च स्खलिता हयाः।
प्रहस्तं तं हि निर्यान्तं प्रख्यातगुणपौरुषम्।
युधि नानाप्रहरणा कपिसेनाभ्यवर्तत॥ **6.57.40**॥

अथ घोषः सुतुमुलो हरीणां समजायत।
वृक्षानारुजतां चैव गुर्वीर्वै गृह्णतां शिलाः॥ **6.57.41**॥

नदतां राक्षसानां च वानराणां च गर्जताम्।
उभे प्रमुदिते सैन्ये रक्षोगणवनौकसाम्॥ **6.57.42**॥

वेगितानां समर्थानामन्योन्यवधकाङ्क्षिणाम्।
परस्परं चाह्वयतां निनादः श्रूयते महान्॥ **6.57.43**॥

ततः प्रहस्तः कपिराजवाहिनी -
    मभिप्रतस्थे विजयाय दुर्मतिः।
विवृद्धवेगां च विवेश तां चमूं
    यथा मुमूर्षुः शलभो विभावसुम्॥ **6.57.44**॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे सप्तपञ्चाशः सर्गः॥